# শংভুস্তৱঃ

## Shambhustavah

---

শংভুস্তৱঃ ।

কৈলাসশৈলনিলযাত্কলিকল্মষঘ্না-
ঙ্চন্দ্রার্ধভূষিতজটাদ্ৱটমূলৱাসাত ।
নম্রোত্তমাঙ্গৱিনিৱেশিতহস্তপদ্মা-
চ্ছংভোঃ পরং কিমপি দৈৱমহং ন জানে ।।১।।

নাকাধিনাথকরপল্লৱসেৱিতাঙ্ঘ্রে-
র্নাগাস্যষণ্মুখৱিভাসিতপার্শ্ৱভাগাত ।
নির্ব্যাজপূর্ণকরুণান্নিখিলামরেড্যা-
চ্ছংভোঃ পরং কিমপি দৈৱমহং ন জানে ।।২।।

মৌনীন্দ্ররক্ষণকৃতে জিতকালগর্ৱাত-
পাপাব্ধিশোষণৱিধৌ জিতৱাডৱাগ্নেঃ।
মারাঙ্গভস্মপরিলেপনশুক্লগাত্রা-
চ্ছংভোঃ পরং কিমপি দৈৱমহং ন জানে ।।৩।।

ৱিজ্ঞানমুদ্রিতকরাচ্ছরদিন্দুশুভ্রা-
দ্বিৱজ্ঞানদাননিরতাজ্জডপংক্তযেঽপি ।
ৱেদান্তগেযচরণাদ্বিধিৱিষ্ণুসেৱ্যা-
চ্ছংভোঃ পরং কিমপি দৈৱমহং ন জানে ।।৪।।

ইতি শংভুস্তৱঃ সংপূর্ণঃ ।।

www.shaivam.org